ISSN 2583-9020

An Electronic Veda Journal

# वेद वाणी

(vEda vaaNee)

Volume 2, Issue 1, April 2024



Printed and Published by

**Veda Samskruti Samiti**

Malkajgiri

Hyderabad TS

# मत्तविलासप्रहसनस्य साहित्यशास्त्रीया समीक्षा – प्रथमो भागः

**Kamakshi Ramanarayanan**
Arudhra Education and Research Foundation, Lingi Chetty Street, Mannady, Chennai
arudhraresearchfoundation@gmail.com

## I. उपक्रमः

“नाटकं सप्रकरणमङ्को व्यायोग एव च । भाणः समवकारश्च वीथी प्रहसनं डिमः॥
ईहामृगश्च विज्ञेया दशेमे नाट्यलक्षणे।”
इति दृश्यकाव्यस्य दशविधता प्रतिपादिता भरतमुनिभिर्नाट्यशास्त्राख्ये साहित्यशास्त्रस्य परमाधारभूते ग्रन्थे[1]। तत्र हास्यरसप्रधानतया वैलक्षण्यमावहतः प्रहसनस्य लक्षणायते मत्तविलासप्रहसनमिति रूपकम्। इदं षष्ठसप्तमशताब्द्योः पल्लवराज्यस्य सिंहासनमलङ्कुर्वद्भिर्महेन्द्रविक्रमवर्मभिः प्रणिन्ये।[2] काल्पनिकेन कथावस्तुना विरचितमिदं प्रहसनं चिराद्रङ्गेषु प्रयोगदशां गतं सचेतसां मनांसि रञ्जयति।[3] कथेयं षष्ठशताब्दीयां सामाजिकीं स्थितिं समनुवर्णयन्ती, हासजनकस्य ग्राम्यजनभ्रष्टाचारस्य प्रकाशनेन व्यतिरेकविधया हितम् उपदिशन्ती निसर्गविरुद्धयोरपि हास्यौचित्ययोर्नितराम् अनुरूपं समागमं दर्शयति।

अस्मिल्लेँखे साहित्यशास्त्रोक्तस्य नाट्यलक्षणस्य दृष्ट्या प्रहसनस्यास्य– इतिवृत्तनेतृरसांशैर्गौरवम्, औचित्यगर्भितत्वम्, अलङ्कारसौष्ठवं, काव्यानुरूपप्रयोजनवत्त्वं, तथा च कवेरस्य सूक्ष्मेक्षिका इत्येते विषयाः परिशील्यन्ते। किं चात्र प्रधानस्य हास्यरसस्य पोषकतया तर्कादिशास्त्रान्तराणामपि संस्पर्शः समीक्ष्यते। विचारेणानेन भारतीयवाङ्मये मत्तविलासप्रहसनस्य गरिम्णो निर्विवादनिरूपणं चिकीर्ष्यते।

## II. इतिवृत्तविचारः

### i. कथावस्तुपरिचयः

a) कथावस्त्विदम् उत्पाद्यं मर्त्यं च[4]। सर्वस्याप्यस्य कविकल्पनामात्रसमुद्भवाद्दिव्यपुरुषराहित्याच्च। कथेयं काञ्चीनगरस्य वीथीषु प्रवर्तते।
b) सुरापाननिरतः कश्चित्कापालिकः कान्तासमेतः स्वहस्तात् परिच्युतं

---

[1] नाट्यशास्त्रम् (१८।२-३ p. १४३४)
[2] N. P. Unni, 1974.
[3] Bhadra P.K.M. 2015. pp. 112–120.
[4] “प्रख्यातोत्पाद्यमिश्रत्वभेदात्त्रेधापि तत्त्रिधा। प्रख्यातमितिहासादेरुत्पाद्यं कविकल्पितम्॥” (दशरूपकम् १।१५)

जीवितप्रियं भिक्षाकपालम् अन्विष्यन् यदृच्छयाभ्यागतेन बुद्धभिक्षुणा सह निजकपालापहरणशङ्कया शुष्ककलहे व्यापृतो भवति। तयोराक्रोशं निशम्य चाभ्युपयाति तत्समाश्वासनच्छलेन कश्चित् पाशुपतः। वितण्डावादप्रतिवादसरण्या पराकाष्ठां नीतस्य कलहस्यापरिहार्यप्रायत्वे तत्रान्तरे प्रविशति कपालवाहिनं रथ्यामृगम् अनुधावन् कश्चनोन्मत्तकः। कथंचित् तमनुनीय स्वं कपालं लभते कपाली। सर्वेऽपि पूरितनिजकामनाः सौहार्दभावम् आवहन्तो निष्क्रामन्ति। इति कथासंक्षेपः।

## ii. प्रहसनलक्षणसमन्वयः

“तद्वत् प्रहसनम्”[5] इति शास्त्रोक्तरीत्या प्रहसने भाणस्य सन्धिकथावस्त्वादीनाम् अतिदेशात् पञ्चसन्धिषु मुखनिर्वहणयोरेवात्र संभवः। (तौ च वक्ष्येते।) प्रहसनं त्रिविधं "शुद्धवैकृतसङ्करैः”[6]। कपालिशाक्यभिक्ष्वादिपात्राणां पाखण्डिनां हास्यपूर्वकस्य यथावद्व्यवहारस्य दर्शनेन **शुद्धत्वम्**[7] अस्य प्रहसनस्य। वक्ष्यमाणरीत्या वीथ्यङ्गमिश्रणात् **सङ्कीर्णत्वम्** अपि[8]।

## iii. प्रस्तावना

*“भाषावेषवपुः … स व्याप्तावनिभाजनं दिशतु वः दिव्यः कपाली यशः [१]”* [9] इत्याशीरूपमङ्गलेन कपालिभाजनशब्दयोः प्रयोगसामर्थ्यात् प्रस्तुतरूपकस्य नेता कापालिकः, कथावस्तुमूलभूतं कपालं च सूच्येते इति **स्थापनायाः**[10] प्रारम्भः। ततश्च नटीसूत्रधारयोर्नाट्यप्रयोगविषयिणि वार्तालापे *“पल्लवकुलधरणिमण्डलकुलपर्वतस्य सर्वनयविजितसमस्तसामन्तमण्डलस्य आखण्डलसम-पराक्रमश्रियः श्रीमहिमानुरूपदानविभूतिपरिभूतराजराजस्य श्रीसिंहविष्णुवर्मणः पुत्रः शत्रुषड्वर्गनिग्रहपरः परहितपरतन्त्रतया महाभूतसधर्मा महाराजः श्रीमहेन्द्रविक्रमवर्मा [३]”* इत्यतः *“अर्घन्ति बहु सूक्तानि सतां सारलघून्यपि [४]”* इति यावता सूत्रधारवचनेन कवेर्गुणगणप्रशंसया

[5] दशरूपकम् ३।५४

[6] दशरूपकम् ३।५४

[7] “पाखण्डिविप्रप्रभृतिचेटचेटीविटाकुलम्॥ चेष्टितं वेषभाषाभिः शुद्धं हास्यवचोऽन्वितम्” (दशरूपकम् ३।५५)

[8] “सङ्कराद्वीथ्या सङ्कीर्णं धूर्तसङ्कुलम्” (दशरूपकम् ३।५६)

[9] *[ ]* इति चिह्नेन *The Mattavilâsaprahasana of Srî Mahendravikramavarman* इति श्रीगणपतिशास्त्रिभिः संशोधितात् पुस्तकादुद्धृतस्य मूलवाक्यस्य पुटसङ्ख्या निर्दिश्यते।

[10] “सूचयेद्वस्तु बीजं वा मुखं पात्रमथापि वा” (दशरूपकम् ३।३)

तद्विरचितप्रहसनस्य दर्शने सामाजिकप्रवृत्त्यभिमुखीकरणात् **प्ररोचना**[11]। सूत्रधारस्य वचांसि संस्कृतप्रायाणि, नट्याः प्रत्युक्तयस्तु प्राकृतप्रायाः समुपनिबबन्धिरे। प्रस्तावनान्ते सूत्रधारेण "*युवतिसख एष सुरया कपालविभवः कपालीव [४]*" इति 'एतत्'-शब्दोपक्षेपेण कपालिपात्रप्रवेशनात् **प्रयोगातिशयाख्यः**[12] आमुखप्रकारः।

### iv. सन्धीनां विचारः

अस्मिन् कथावस्तुनि भ्रष्टकपालस्य प्राप्तिः **कार्यं**[13], तस्या इतिवृत्तफलभूतत्वात्। तद्धेतुत्वात् कपालिदेवसोमयोः कपालान्वेषणोद्यमो **बीजम्**[14]।

#### a) मुखसन्धिः

वारुणीपिपासोः कपालिनः"*प्रिये सोमदेवे! ... एष प्रतिगृह्णामि। प्रिये! क्व मे कपालम्?" [६-१०]* इति वचनै**र्मुख**सन्धेः प्रारम्भः[15]। तत्र कपालान्वेषणोद्यमरूपस्य हास्यबीजस्य समुत्पत्तेः। अथ मुखसन्धेरङ्गानि कथ्यन्ते—

- "*आ। तस्मिन्नेव सुरापणे विस्मृतमिति तर्कयामि। भवतु, प्रतिनिवृत्य द्रक्ष्यावः" [१०]*
  इति कपालिनो वाक्येन बीजोपन्यासाद् **उपक्षेपाख्यं** मुखसन्ध्यङ्गम्[16]।

- "*तेन ह्यन्वेषणनिमित्तं सर्वं काञ्चीपुरं परिभ्रमावः" [११]*
  इति देवसोमावचनेन बीजस्य बहुलीभावात् **परिकर** इत्यङ्गम्[17]।

- शाक्यभिक्षोर्निरीक्षणमात्रेण "*प्रिये! हन्त लब्धं कपालम्" [१३]*
  इति कपालिवाक्येन बीजस्य निश्चयापत्तिसूचनात् **परिन्यासः**[18]।

- "*भो भिक्षो! दर्शय तावत्। यावदेतत्ते पाणौ चीवरान्तःप्रच्छादितं द्रष्टुमिच्छामि" [१४]*
  इति शाक्यभिक्षुहस्तगतवस्तुप्रकटने कापालिकोद्यमस्य दर्शनेन प्रकृतकथारम्भात्**करणम्**[19]।

- शाक्यभिक्षुणा सह प्रवृत्ते वाक्कलहे "*भगवन्! परिश्रान्त इव लक्ष्यसे। नैतत् सुखोपायसुलभं कपालम्। तदेतेन गोशृङ्गेण*

---

[11] "उन्मुखीकरणं तत्र प्रशंसातः प्ररोचना" (दशरूपकम् ३।६)

[12] "एषोऽयमित्युपक्षेपात्सूत्रधारप्रयोगतः। पात्रप्रवेशो यत्रैष प्रयोगातिशयो मतः॥" (दशरूपकम् ३।११)

[13] तद्धेतुः कार्यस्य हेतुः ; "कार्यं त्रिवर्गस्तच्छुद्धमेकानेकानुबन्धि च" (दशरूपकम् १।१६)

[14] "स्वल्पोद्दिष्टस्तु तद्धेतुर्बीजं विस्तार्यनेकधा" (दशरूपकम् १।१७)

[15] "मुखं बीजसमुत्पत्तिर्नानार्थरससम्भवा" (दशरूपकम् १।२४)

[16] "बीजन्यास उपक्षेपः" (दशरूपकम् १।२७)

[17] "तद्बाहुल्यं परिक्रिया" (दशरूपकम् १।२७)

[18] "तन्निष्पत्तिः परिन्यासः" (दशरूपकम् १।२७)

[19] "करणं प्रकृतारम्भः" (दशरूपकम् १।२९)

*पीत्वा जातबलो भूत्वानेन सह विवादं कुरु” [१५]*

इत्यादिना वचसा देवसोमया कपालिनः प्रोत्साहनाद् **भेदः**[20]।

- लालनताडनादिभिः कथंचिदनुनीतेन शाक्यभिक्षुणा चिरात् स्वचीवरान्तर्वर्तिनि भिक्षाभाजने प्रकटीकृते

  *“आ मम नष्टभिक्षाभाजनदर्शनकुतूहलमलयानिलप्रयुक्ता या ध्रुवमस्य नृत्तबुद्धिः प्रीतिलताया विलसितेषु” [२१]*

  इति कपालदर्शनजनितकुतूहलेन नृत्यतः कापालिकस्याद्भुतावेशात् **परिभावः**[21]।

- शाक्यभिक्षुणा प्रदर्शितं भिक्षापात्रं समीक्ष्य

  *“हा हतास्मि मन्दभागा। सर्वलक्षणसम्पन्नतया कमलासनशीर्षकपालानुभावस्य पौर्णमासीसोमदर्शनस्य नित्यसुरागन्धिन एतस्य [कपालस्य] मलिनपट-संसर्गेणेयमीदृश्यवस्था संवृत्ता” [२२]*

  इत्यादिना देवसोमावाक्येन कपाललाभजनितसुखस्य तद्वर्णदूषणजनितदुःखस्य च यौगपद्येन सूचनाद् **विधानम्**[22]।

- कपालिशाक्यभिक्ष्वोः कलहे वरीवर्धिते

  *“नायं व्यवहारो मया परिच्छेत्तुं शक्यते। तदधिकरणमेव यास्यामः” [२३]*

  इति पाशुपतवचनेन कपाललाभरूपस्य फलस्य सिद्ध्यर्थं सदुपायस्य प्रकाशनाद् **युक्तिः**[23]।

b) **निर्वहणसन्धिः**

*“महासाधोश्चण्डालकुक्कुरस्य सकाशादधिगतमेतत्कपालं प्रतिगृह्णातु भगवान्” [२६]*

इत्युन्मत्तकस्य वचनात् प्रारभ्य **निर्वहण**सन्धिः। तत्र मुखसन्धौ निक्षिप्तानाम् अर्थानाम् ऐकार्थ्य-दर्शनात्[24]। ते चार्थाः— कपालिनिष्ठः कपालप्राप्तिरूपः, शाक्यभिक्षुनिष्ठः कपालिवैरान्मुक्तिरूपः, पाशुपतनिष्ठः कलहनिवृत्तिरूपश्च। तत्र निर्वहणाङ्गान्युच्यन्ते –

- उन्मत्तकेन कपाले भूमौ निक्षिप्ते

  *“अस्मदीयं कपालम्। ... भगवत्प्रसादात् पुनरपि कपाली संवृत्तः” [२७]*

---

[20] “भेदः प्रोत्साहना मता” (दशरूपकम् १।२९)

[21] “परिभावोऽद्भुतावेशः” (दशरूपकम् १।२९)

[22] “विधानं सुखदुःखकृत्” (दशरूपकम् १।२८)

[23] “संप्रधारणमर्थानां युक्तिः” (दशरूपकम् १।२८)

[24] “बीजवन्तो मुखाद्यर्था विप्रकीर्णा यथायथम्॥ ऐकार्थ्यमुपनीयन्ते यत्र निर्वहणं हि तत्।” (दशरूपकम् १।४८-४९)

इति कपालिनो वचनेन बीजस्योपगमात् **सन्धिरित्यङ्गम्**[25]।

- आसन्ने कपाललाभे तद्गृहीत्वा पुनरुन्मत्तकस्यापगमे
*"एष यमपुरुषो मे जीवितं हरति। अभ्यवपद्येतां भवन्तौ"* [२७]
इति पाशुपतशाक्यभिक्षूभयसहायेन कपालिना कार्यस्यान्वेषणाद् **विबोधः**[26]।
- शाक्यभिक्षुणा*"परपक्षस्य लाभेनाहं परितुष्टोऽस्मि"* [२८]
इति कपाललाभरूपस्य कार्यस्योपसंहृत्या **ग्रथनम्**[27]।
- *"चिरं मया चरितमखण्डितं तपो महेश्वरे भगवति भक्तिरस्ति मे। तिरोहितः स तु सहसा सुखेन नस्त्वमद्य यत् कुशलि कपाल दृश्यसे॥"* [२९]
इति चिराल्लब्धं कपालमालिङ्गता कपालिना संपादितस्य कार्यस्य स्वयमाख्यानाद् **निर्णयः**[28]।
- *"भगवन्! चन्द्रसमागतमिव प्रदोषं भगवन्तं पश्यन्त्या अद्यानन्दतीव मे दृष्टिः"* [२९]
इति कपालरूपवाञ्छितफलागमस्य वर्णनेन **आनन्दः**[29]।
- *"अयं चाद्य प्रभृति,
विरोधः पूर्वसंबद्धो युवयोरस्तु शाश्वतः। परस्परप्रीतिकरः किरातार्जुनयोरिव॥"* [२९]
इति पाशुपतवचनेन कपालिनागसेनयोर्वैरजनितदुःखनिर्गमस्य सूचनात् **समयः**[30]।
- *"यन्मयापराधः कृतः, तत् प्रसन्नहृदयं त्वामिच्छामि"* [२९]
इति क्षमाप्रार्थनद्वारा कपालिकर्तृकेन नागसेनतोषणेनात्र **प्रसादो**[31] नामाङ्गम्।
- पुनर्लब्धे कपाले, *"किं ते प्रियं करोमि"* इति शाक्यभिक्षुणा पृष्टे
*"यदि मे भगवान् प्रसन्नः, किमतः परमहमिच्छामि"* [३०]
इति कपालिनो वाक्येन वराप्तेः कथनात् **काव्यसंहारः**[32]।
- *"शश्वद् भूत्यै प्रजानां वहतु विधिहुतामाहुतिं जातवेदाः..."* [३०]
इत्यादिना भरतवाक्येन शुभस्य शंसनात् **प्रशस्तिः**[33]।

---

25 "सन्धिर्बीजोपगमनम्" (दशरूपकम् १।५१)
26 "विबोधः कार्यमार्गणम्" (दशरूपकम् १।५१)
27 "ग्रथनं तदुपक्षेपः" (दशरूपकम् १।५१)
28 "अनुभूताख्या तु निर्णयः" (दशरूपकम् १।५१)
29 "आनन्दो वाञ्छितावाप्तिः" (दशरूपकम् १।५२)
30 "समयो दुःखनिर्गमः" (दशरूपकम् १।५२)
31 "प्रसादः पर्युपासनम्" (दशरूपकम् १।५२)
32 "वराप्तिः काव्यसंहारः" (दशरूपकम् १।५४)

v. वीथ्यङ्गानि

a) आ मञ्चप्रवेशादेव कपालिना

*“त्वया परमव्रतस्य विधिवदनुष्ठानेनान्य एव रूपातिशयः क्षणात्प्रतिपन्नः। तव हि,*

*रणानि हसितान्यव्यक्तवर्णा गिरः।*

*रागाक्रान्तमधीउद्भिन्नश्रमवारिबिन्दु वदनं सभ्रूलताविभ्रमं खेलं यातमकारतारमलसापाङ्गं युगन्नेत्रयोरंसोपान्तविलम्बिनश्च विगलन्मालागुणा मूर्धजाः॥” [५]*

इत्यादिना निजदयितारूपलावण्यस्य अतिशयवर्णनेन, देवसोमया च कालान्तरे *“अहो रसिकः खल्वाचार्यः” [९]*

इत्यादिवचनेन मिथो मिथ्यास्तुतेः क्रियमाणत्वात् **प्रपञ्चः**[34]।

b) आत्मनः सुरावशंगतत्वं लक्षयता कपालिना *“कथं मद्यदोषो मामेवं सङ्क्रामयति। भवतु भवतु। अद्यप्रभृति मद्यनिषेवणान्निवृत्तोऽस्मि” [६]*

इति मद्यपानस्य दोषे द्योतिते, सपद्येव*“भगवन्! मा मा मम कारणाद्व्रतभङ्गेन तपः खण्डयितुम्”* इति देवसोमया वस्तुतो दुष्टस्यापि सुरापानस्य तपोरूपतया गुणत्वप्रतिपादनाद् **मृदवम्**[35]।

किं च *“ये ब्रह्मचर्यकेशनिर्लोटन-…मलिनपटपरिधानादिभिः प्राणिनः परिक्लेशयन्ति” [७]*

इति कापालिकस्य वचसा ब्रह्मचर्यादिगुणेषु दोषत्वारोपोऽपि **मृदवम्**।

c) रङ्गं प्रविशतोन्मत्तकेन

*“गृहीतशूला बहुवेषधारिणः शतं पिशाचा उदरे वहन्ति मे।*

*शतं च व्याघ्राणां निसर्गभीषणं मुखेन मुञ्चाम्यहं महोरगान्॥” [२५]*

इत्यादिना सुतराम् असम्बद्धवृत्तान्तस्य कथनाद् **असत्प्रलापः**[36]।

d) चीवरान्निजभिक्षापात्रं प्रकटीकृतवता शाक्यभिक्षुणा

*“भगवन् ! केन कारणेनैतन्न लक्ष्यते। भोः आचष्टां भगवान्। अस्यायं वर्णः”*

इत्यभिहिते, *“किमत्र वक्तव्यम्। ननु मया दृष्टम्। काकादपि कृष्णमिदं कपालम्”*

इति कापालिकस्य प्रतिवचने,*“तेन ह्येतन्मदीयमिति स्वयमेवाभ्युपगतम्”*

इति बुद्धभिक्षोः प्रतिवाक्ये, पुनश्च *“सत्यमभ्युपगतं तव वर्णान्तरकरणे नैपुण्यम्” [२१]*

इति कपालिनः प्रत्युत्त्या परस्परं वाक्यैराधिक्यवचनेन स्पर्धाविवर्धनाद् **अधिबलम्**[37]।

---

[33]“प्रशस्तिः शुभशंसनम्” (दशरूपकम् १।५४)

[34]“असद्भूतं मिथः स्तोत्रं प्रपञ्चो हास्यकृन्मतः” (दशरूपकम् ३।१५)

[35]“दोषा गुणा गुणा दोषा यत्र स्युर्मृदवं हि तत्” (दशरूपकम् ३।२१)

[36]“असम्बद्धकथाप्रायोऽसत्प्रलापो यथोत्तरः” (दशरूपकम् ३।२०)

**e)** उन्मत्तकात् कथंचित् कपाले प्रतिलब्धे, *"चिरं मया चरितमखण्डितं तपः..." [२९]* इति कापालिकस्याभ्युदयागमेन *"परपक्षस्य लाभेनाहं परितुष्टोऽस्मि" [२८]* इति शाक्यभिक्षुरपि कापालिकवैरभावान्मुक्तः सन् हर्षं प्राप्नोतीति **अवलगितं**[38] नाम वीथ्यङ्गम्।

## III. पात्रचरित्रचित्रणम्

रूपकेऽस्मिन् सूत्रधारं नटीं च विहाय, पञ्च पात्राणि विद्यन्ते – कपाली देवसोमा शाक्यभिक्षुः पाशुपत उन्मत्तकश्चेति। एषु कपालिपाशुपतौ संस्कृतेन तदितरे च प्राकृतेन व्यवहरन्तीति विवेकः।

### i. कापालिकः

तत्र सत्यसोमो नाम कपाली नेता – स चाधमप्रकारकः[39]। परमशिवोपासकोऽप्यसौ वामाचारे प्रवृत्तो निरन्तरं मद्यमांसादिनिषेवणे निरतः। ईदृशाचरणस्य मोक्षप्राप्तिजनकतां श्रद्दधानेनानेन भणितं हि *"येनेदमीदृशमदृश्यत मोक्षवर्त्म दीर्घायुरस्तु भगवान् स पिनाकपाणिः" [७]* इति। एतन्महाव्रतानुष्ठाने च निजभिक्षाभाजनत्वेन प्रथमस्थानं वहति तस्य कपालं, यदवलम्ब्य प्रहसनस्यास्य कथावस्तु न्यबन्धि। स्पष्टं बुद्ध्यते च कपालस्य प्राधान्यं यदा तद्भ्रंशो लक्षितः कपालिना ; कपाललोपे विलपितं हि तेन*"हा हतोऽस्मि। भ्रष्टं मे तपः। केनाहमिदानीं कपाली भविष्यामि। ... येन मम पानभोजनशयनेषु नितान्तमुपकृतं शुचिना। तस्याद्य मां वियोगः सन्मित्रस्येव पीडयति॥" [११]* इति। अपि च संस्कृतया गिरा संभाषमाणस्यास्य कपालिनो नानाविधसिद्धान्तपरिचयः पदे पदे दृश्यते, *"ये ब्रह्मचर्यकेशनिर्लोटनमलधारणभोजनवेलानियम-मलिनपटपरिधानादिभिः प्राणिनः परिक्लेशयन्ति" [७]* इत्यादिना स्ववचसा। तथा च कपालिना बौद्धादिनास्तिकमतेषु प्रदर्श्यमानाया अवज्ञाया बीजं ब्रह्मचर्यादिनियमपरिपालनजन्यश्रमाद्भयं, न तु पुनः स्वस्यास्तिकत्वमिति ज्ञायते। परमतखण्डनैकलक्ष्यश्चासौ तर्कवेदान्तादिनयैर्यथावसरं स्वपक्षपरिग्रहयोग्यतासाधकत्वेनार्थान् स्वैरं कल्पयन् सदा विवादविवर्धनचतुरो विलसति।

### ii. देवसोमा

देवसोमा नाम्नी बभ्रुकल्पाख्यपाशुपतस्य भूतपूर्वप्रियेयम् अर्थलोभेन सत्यसोमस्य दयिता संवृत्ता। तदनुरूपाचारशीलेयं धर्माभासवचसा मद्यपानदानादिना च तं महाव्रतानुष्ठाने प्रोत्साहयति कलहेषु प्रोद्दीपयति च। यथा कपालमनवलोकयति कपालिनि सुरापणात्प्रतिनिवृत्ते तस्या वचः*"अधर्मः खल्वेष आदरोपनीताया भिक्षाया अप्रतिग्रहः" [१०]*

---

[37]"अन्योन्यवाक्याधिक्योक्तिः स्पर्धयाधिबलं भवेत्" (दशरूपकम् ३।१८)

[38]"यत्रैकत्र समावेशात्कार्यमन्यत्रप्रसाध्यते। प्रस्तुतेऽन्यत्र वान्यत्स्यात्तच्चावलगितं द्विधा॥" (दशरूपकम् ३।१४-१५)

[39]"हास्यादिरसप्रधानत्वे ह्यधम एव नायकः" इत्यभिनवभारत्याम्। (अभिनवभारती १८।१२६ – p. १५२२)

इति। यथा वा कपालं दातुं शाक्यभिक्षुं प्रार्थयमानं कपालिनं प्रति *"केवलं लाल्यमानो न दास्यति। तदेतस्य हस्तादाच्छिद्य गच्छावः" [१७]* इति कपालपुनर्लाभार्थमुपायान्तरप्रदर्शनेन, *"केशापकर्षणं रूपयित्वा निरालम्बना पतिता" [१८]* इत्याङ्गिकाभिनयेन च निजकान्तकलहेषु देवसोमाया मनोवाक्कायपूर्वको भागस्वीकारः सुव्यक्तः।

**iii. शाक्यभिक्षुः**

नागसेनो नाम बौद्धमतावलम्बी भिक्षुरयम् आप्रहसनान्तं कापालिकस्य निन्दनापात्रं भवति। काषायवेषधार्यप्यसौ सुरादिनिषिद्धपदार्थेभ्यः स्पृहयमाणः स्वशास्त्रोपदिष्टादार्याष्टाङ्गमार्गात्[40] स्खलित एव भूयशो लक्ष्यते। अस्य प्रच्छन्नचारित्वम् आ रङ्गप्रवेशादेव विशदं भवति। यथा *"अहो उपासकस्य धनदासश्रेष्ठिनः सर्वावासमहादानमहिमा यस्मिन् मयाभिमतवर्णगन्धरसो मत्स्यमांस-प्रकारबहुलोऽयं पिण्डपातः समासादितः [११,१२]"* इति प्रविशतो निजचीवरान्ताच्छादित-भिक्षाभाजनवतः शाक्यभिक्षोः स्वगतभाषणेनैव परिपालनीयाहिंसादिधर्मस्याप्यस्य[41] प्राणिवधैक-प्राप्ये मांसे रुचिः प्रकाशिता। विहारे भोजनपर्यङ्कादिभिः सुखं निवसन्नसौ स्त्रीसम्पर्कसुरापान-मात्रयोर्वर्जनात्समुद्विग्नमना बौद्धधर्ममूलग्रन्थात्तद्विधायकवाक्यानां लोपमाशङ्क्य तदन्वेषणमेव स्वजीवनलक्ष्यं करोति। प्रपञ्चितं चेदमात्मवचसैव – *"भोः! परमकारुणिकेन भगवता तथागतेन प्रासादेषु वासः ..." [१२]* इत्यादिना *"सम्पूर्णं बुद्धवचनं लोके प्रकाशयन् सङ्घोपकारं करोमि" [१२]* इत्यादिना च। किं च जनापवादभीत्या स्त्रीसुरासेवनमप्रकटयन्नयम् अशमितां तदुपभोगतृष्णां हृदयेन नित्यं वहति। उपभोगेषु लब्धावकाशस्य त्वस्य हृदयसमवस्था स्वगतभाषणेनाविर्भवति। यथा देवसोमायाः प्रथमदर्शने *"अहो ललितरूपोपासिका" [१४]* इति, यथा वा तया पश्चान्मद्यपाने समर्पिते *"अहो सुखोपनतोऽभ्युदयः। एतावान् दोषः – महाजनो द्रक्ष्यति" [१६]* इति। अनेन न केवलं शाक्यभिक्षोर्वीतेन्द्रियनिग्रहत्वं किन्तु लोकात् तद्गोपनपटुत्वमपि प्रदर्शितम्।

**iv. पाशुपतः**

असौ बभ्रुकल्पनामकः पाशुपतमतानुयायी। निजप्रेयसीं देवसोमां धनेन लोभयित्वा स्ववशं कृतवते कापालिकायासूयन्नयं कलहमध्यस्थव्याजेन कपालिनः पराजयं काङ्क्षमाणस्तिष्ठति। उक्तं हि स्वयम् –*"तां*

---

[40] "एषैव आर्याष्टाङ्गो मार्गो। तद्यथा सम्यग्दृष्टिः सम्यक्संकल्पः सम्यग्वाचा सम्यक्कर्मान्तः सम्यग्जीवः सम्यग्व्यायामः सम्यक्स्मृतिः सम्यक्समाधिः इयं भिक्षवः दुःखनिरोधगामिनी प्रतिपदार्यसत्वं" इति। (महावस्तु अवदानं, ३३२)

[41] "यो खो, ब्राह्मण, पसन्नचित्तो सिक्खापदानि समादियति - पाणातिपाता वेरमणिं, अदिन्नादाना वेरमणिं, कामेसुमिच्छाचारा वेरमणिं, मुसवादा वेरमणिं, सुरामेरयमज्जपमादट्ठाना वेरमणिं")। इति पञ्च शिक्षापदेषु प्राणिहिंसातो विरमणं प्रथममुक्तम्। (दीघनिकायो कूटदन्तसुत्तं १।५।३५२)

*क्षौरिकस्य दासीं मम दयितां चीवरान्तदर्शितया। आकर्षति काकण्या बहुशो गां ग्रासमुष्ट्येव॥ तदिदानीं प्रतिहस्तिप्रोत्साहनेन शत्रुपक्षं ध्वंसयामि" [१९]* इति।

कलहान्ते तु शाश्वतवैरशमनमिच्छन् स शुभाशिषं समुदीर्य स्वकर्तव्यपशुपत्युपासनार्थं निष्क्रामति। *"सुहृदभ्युदयकृतमानन्दं पुरोधाय भगवतः पूर्वस्थलीनिवासिनो धूमवेलां प्रतिपालयामि" [२९]* इति।

v. **उन्मत्तकः**

कापालिकस्य शूल्यमांसगर्भं कपालं बिभ्रच्छुनकम् अनुधावन् रङ्गं प्रविशत्ययम् उन्मत्तकः। ग्रामवीथीषु पर्यटन् कुक्कुरेण समं स्पर्धां कुर्वाणस्तद्भुक्तशेषम् अश्नन् निजजीवनं यापयतीत्ययं दयनीय एव। पात्रानुरूपो विलसत्यस्यासम्बद्धप्रजल्पो यथा*"ग्रामसूकरमारुह्य गगनमुत्पतितेन सागरेण। प्रभज्य रावणं बलाद्गृहीतः शक्रसुतस्तिमिङ्गिलः" [२७]* इति। तस्य जुगुप्सितवेषादिकं च पाशुपतमुखेन वर्णितं*"निर्विष्टोज्झितचित्रचीवरधरो रूक्षैर्नितान्ताकुलैः..." [२६]* इत्यादिना। प्रतिक्षणमपि व्याक्षिप्तचित्तस्यास्य सर्वेऽपि भावाः क्षणभङ्गुराः। स्वभ्रान्तिवशेन यथायं शीघ्रकोपी तथा सुलभतोष्यपि। यथा कपालस्य सुवर्णभाजनभ्रान्त्यायम् उन्मत्तकः *"दास्याः पुत्र! विषं खाद" [२७]* इति कपालिनम् उपालभ्य सपद्येवोन्मत्तकशब्देनापहृतचित्तः सन् 'कोऽयम् उन्मत्तकः' इति पृच्छति। तदा*"अयमिदानीं कुड्येनान्तर्हितः! शीघ्रमनुगम्यताम्" [२८]* इति कपालिनोक्तोऽसौ संतृप्तः स्वप्रतारणमप्यजानन् *"लब्धप्रसादोऽस्मि"* इत्यानन्देन कपालम् उज्झित्य निष्क्रामति।

vi. **उपसंहारः**

इत्थं सर्वाण्यपीमानि पात्राणि प्रायेण रजस्तमोभ्यामाविष्टहृदयानि कुत्सितकार्येषु प्रवृत्तानि मिथ्याचारवन्ति वा लक्ष्यन्ते। एतानि द्वारीकृत्य दुष्टाचरणस्य परिहास्यता कविना सुष्ठु निरूप्यमाणा प्रेक्षकाणां मनस्सु तत्परिहरणीयताबुद्धिं सरसम् उत्पादयति। एवं साङ्गेन कथावस्तुना तदनुरपपात्रैश्च यथालक्षणं समुपनिबद्धस्यास्य प्रहसनस्य कान्तासम्मिततया अधर्मान्निवृत्तिरिति फलवत्ता विस्पष्टा।

(अग्रिमलेखे रसादीनां विचारः प्रस्तूयते।...)

# IV. सन्दर्भसूची

१) Ganapati Sâstrî, T. *The Mattavilâsaprahasana of Srî Mahendravikramavarman.* Editor. Government of His Highness the Maharajah of Travancore, 1917.

२) Gayathri, P. R. मत्तविलासप्रहसनम् *(Tamil Lecture)*. Lectures on Sanskrit texts. https://www.youtube.com/playlist?list=PLhFBbqHpypErQ6jeuYfjtzaoDNCeVLqUB/

३) Bhadra, P. K. M. Mattavilāsaprahasana on Kūṭiyāṭṭam. प्रत्यभिज्ञा, vol. II, no. 1–2, 2015, pp. 112–120.

४) Unni, N. P. *Mattavilasa Prahasana of Mahendravikramavarman*. Editor, 1st ed., College Book House, 1974.

५) Tripathi, R. S. *The Daśarūpaka of Dhañjaya with Avaloka of Dhanika*. Varanasi, Viswavidyalaya Prakashan.

६) भरतमुनिः. नाट्यशास्त्रम् अभिनवगुप्तप्रणीताभिनवभारतीसहितम् – तस्य द्वितीयो भागः, साहित्याचार्यमधुसूदनशास्त्रिभिः संपादितम्, काशीहिन्दूविश्वविद्यालयः.

७) महावस्तु अवदानं Le Mahâvastu Texte Sanscrit. Japan, Meicho-Fukyū-Kai, 1897.

८) सुत्तपिटके दीघनिकायो पठमो भागो सीलक्खन्धवग्गपाळि. धम्मगिरि, इगतपुरी (नासिक), विपश्यना विशोधन विन्यास, १९९३.

## About Author



**Ms. Kamakshi Ramanarayanan**, She has completed BA in Sastri and MA in Acharya from the Saṃskṛta Sāhitya Śāstra of the National Sanskrit University, Tirupati (erstwhile Rashtriya Samskrta Vidyapeetha, Tirupati). She is studying kāvyas and Sāhitya Śāstra under Smt. Visalakshi Sankaran and Smt. P.R. Gayathri. Presently, she is persuing for a PhD in the Vedic Science at the Sri Vidya International University through Arudhra Education and Research Foundation.

# Veda Samskruti Samiti

13-1-62 & 13-1-47/1
Veenapani Nagar, Malkajgiri
HYDERABAD Telangana



Veda Samskruti is an inherent intellectual property of Bhaarata dEsham. It is the basic duty and right of every citizen in Bhaarata dEsham to protect this Intellectual property. Indian Constitution and Law provides provision for protection and preservation of its culture, its monuments, architecture etc.

The Chaturvedas said to have 1131 shaakhaas right up to the time of Aadi Shankaraachaarya and thereafter during last more than ten centuries, many shaakhaas are out of practice due to various reasons and presently only seven shaakaas are in the practice of Guru shiShya parampara.

There is a need to continuously preserve these available shaakhaas which may likely to disappear in future due to various external forces acting in the country vigorously with the power of money and global politics. It is time for the intellectuals of Bharata dEsham to wake-up and work collectively to protect and preserve Veda Samskruti of Bharata dEsham, by empowering the Youth of Bharat dEsham, the future care takers of this great Indian Heritage , with suitable education of our correct history and culture.

The above background lead to formation of this Veda Samskruti Samiti which is registered under Societies acts of Government of Telangana, with Regd. No. 961/2016 by Sri A.H. Prabhakara Rao, who is the Founder and President of the Samiti.

The **vEda vaaNee** e-journal, ISSN 2583-9020, is now publishing its **Volume 2, Issue 1, April 2024.**